National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 277-280
© 2025 NJHSR
www.sanskritarticle.com

**Josimuddin Seikh**
Research Scholar,
Dept. of Sahitya,
National Sanskrit University,
Tirupati (A.P.) 517507

**Correspondence:**
**Josimuddin Seikh**
Research Scholar,
Dept. of Sahitya,
National Sanskrit University,
Tirupati (A.P.) 517507

# महाभारते केषाञ्चन दृष्टिगत-असामान्यवपुर्मानुषाणां सामान्याध्ययनम्

**Josimuddin Seikh**

**सारांशः-**
पृथिव्याः अंशभूताः मानुषाः वैचित्र्ययुक्ताः। यथा तेषां शारिरिकवैविध्यं तथैव मानसिकम्। तत् केवनम् अद्य दृश्यम् एवं न, तत् प्राचीने कालेऽपि आसीत्। त्रिकालज्ञाः कवयः तेषां रचनायैः एवं विषयं ज्ञापयन्ति। विविधेषु ग्रन्थेषु तस्य उपस्थितिः परिलक्ष्यते। एतादृशः एकः ग्रन्थः वर्तते महाभारतं यत्र भिन्नं भिन्नं मनुष्यशारीरं दृश्यते। अस्मिन् शोधलेखे त्रयाणां दृष्टिगत-असामान्यवपुर्मानुषाम् आलोचना कृता। तेषां सामान्यपरिचयः, शारीरिक-असामान्यता, कर्मजीवनं, भूमिका इत्यादयः विषयाः अत्र अवधानपूर्वकं विवर्णिताः। एतत् अध्ययनं दर्शयति यत् तत्समाजस्थ-दृष्टिगत-असामान्यवपुर्मानुषैः सह वर्तमानकालस्थ-दृष्टिगत-असामान्यवपुर्मानुषाणां सादृश्यं विद्यते विशेषतः असामान्यवपुर्मानुषभवनपश्चात् कारणे जीवनपरिचालनायां च। पुनश्च शरीरविज्ञानक्षेत्रे तात्कालिकः उन्नतः समाजोऽपि अस्मिन् दर्शितः येन तत्समाजस्य चिकित्सीय-उन्नतेः धारणा लभ्यते।

**भूमिका-**
महाभारतं न केवलम् एकः धर्मग्रन्थः, अपिच इतिहासग्रन्थः। अत्र अष्टादशपर्वेषु तत्समयस्य मानुषाणां शरीरे आकार-क्षमता-लिङ्गगताः असामान्यताः वर्णिताः। अतः एतत् वचनं सत्यमेव यत् यद्यद् महाभारते प्राप्यते तत्तत् अन्यत्र दृश्यते। पुनश्च यत् महाभारते नास्ति तत् अन्यत्रापि नास्ति।

**'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्।'[1]**

**बीजशब्दाः-** दृष्टिः, सामान्यम्, असामान्यम्, वपुः, मानुषः

**उपनन्युः-**
महाभारतस्य आदिपर्वणि पौष्यपर्वाध्याये उपमन्योः कथा प्राप्यते। महर्षेः आयोदधौम्यस्य महान् भक्तिपरायणः शिष्यः आसीत् उपमन्युः।

**'अथापरः शिष्योऽस्यैवायोदस्य धौम्यस्योपमन्युर्नाम'।।[2]**

उपमन्युः गुरोः गोचारणस्य दायित्वप्राप्तः आसीत्।

**'तं चोपाध्यायः प्रेषयामास 'वत्सोपमन्यो ! गा रक्षस्व' इति ॥[3]**

एकदा गुरुणा पृष्टः यत् सः तादृशः स्थूलकायः किं खादित्वा अभवत्। तदा उपमन्युः प्रत्युवाच

**'भो भैक्ष्येण वृत्तिं कल्पयामि' इति।।[4]**

गुरुरादेशेन गुरवे अर्पणं विना भिक्षाग्रहणम् अनुचितमिति श्रुत्वा उपमन्युः याचनात् अनन्तरम् यत् किमपि प्राप्नोति स्म तत् गुरवे ददाति स्म।

तथापि यदा गुरुः पूर्ववत् पृष्टवान् यत् तस्मै भिक्षान्नं दत्त्वापि केन प्रकारेण किं खादित्वा वा सः तावान् स्थूलकायः। तदा शिष्यः अवदत् यत् गुरुं भिक्षां दत्त्वा सः पुनः भिक्षां कृत्वा स्वस्य उदरं पुरयति इति। आयोदः धौम्यः द्विवारं भिक्षां कर्तुं निषेधं करोति यतः एतेन अन्येषां जीवनसाधनेषु कष्टं भवति तस्य लोभं वर्धयिष्यति च।

**'भगवते निवेद्य पूर्वमपरं चरामि। तेन वृत्तिं कल्पयामि' इति॥[5]**

**'नैषा न्याय्या गुरुवृत्तिः अन्येषामपि भैक्ष्योपजीविनां वृत्त्युपरोधं करोषि, इत्येवं वर्तमानो लुब्धोऽसि' इति ॥[6]**

गुरोः आज्ञाम् अनुसृत्य अपि शिष्यः कथं स्वस्थः तिष्ठति इति गुरुः पुनः पृष्टवान्। तदा उपमन्युः आश्रमस्य गोदुग्धं पिबति इति अवदत् तदा अनुज्ञां विना दुग्धसेवनं निवर्तयितुं गुरुः आज्ञापितवान्।

**'भो एतासां गवां पयसा वृत्तिं कल्पयामि' इति।**

**'नैतन्याय्यं पय उपयोक्तुम्। भवतो मया नाभ्यनुज्ञात' इति॥[7]**

तदनन्तरमपि यदा गुरुः शिष्यं अत्यन्तं स्थूलं दृष्ट्वा पुनः जिज्ञासां प्रकटितवान्।

**'वत्सोपमन्यो भैक्ष्यं नाश्नासि, न चान्यच्चरसि, पयो न पीबसि, पीबानसि भृशम् केनेदानीं वृत्तिं कल्पयसि' इति ॥[8]**

तदा उपमन्युः अवदत् यत् सः दुग्धं पिबतां वत्सानां मुखात् यत् किमपि निष्क्रान्तं भवति तत् पिबति इति। एतत् श्रुत्वा महर्षिः अवदत् यत् वत्साः सहानुभूतेः कारणात् बहु फेनम् उत्पादयन्ति, फलतः तेषां पोषणं बाधितं भवति। अतः सः शिष्यस्य एतत् कार्यं निषेधं कृतवान्।

**'एते त्वदनुकम्पया गुणवन्तो वत्साः प्रभूततरं फेनमुद्गिरन्ति। तदेषामपि वत्सानां वृत्त्युपरोधं करोष्वेवं वर्तमानः। फेनमपि भवान्न पातुमर्हति' इति।[9]**

उपमन्युः परमभक्तः शिष्यः तस्य गुरोः प्रत्येकं उपदेशं निषेधं च अक्षरशः पालनम् अकरोत्। प्रतिदिनं सः बुभुक्षया दुर्बलः अभवत्। किन्तु सः गावः तथैव चारयति स्म। एकदा सः बुभुक्षितो भूत्वा अर्कपत्रं खादितवान्। तत् खादनस्य परिणामेण तस्य दृष्टिः नष्टा जाता। तथापि सः गोचारणं न त्यक्तवान्।

**फेनं नोपयुङ्क्ते स कदा चिदरण्ये क्षुधार्तोऽर्कपत्राण्यभक्षयत् ॥**

**स तैरर्कपत्रैर्भक्षितैः क्षारतिक्तकटुरूक्षैस्तीक्ष्ण-विपाकैश्चक्षुष्युपहतोऽन्धो बभूव।[10]**

एकदा दृष्टिहीनः उपमन्युः गवां चारयन् शुष्ककूपे पतितः। तस्य पुनरागमने असामान्यविलम्बं दृष्ट्वा आयोद्धौम्यः अन्यैः शिष्यैः सह तम् अन्वेष्टुं निर्गतवान्। यदा शिष्यः कूपात् गुरोः आह्वानस्य प्रतिस्पन्दनम् अयच्छत्।

**अयमस्मिन् कूपे पतितोऽहम्' इति।[11]**

तदा सः ततः उद्धारितः। 'कथं त्वमस्मिन् कूपे पतितः' इति गुरुणा पृष्टे सति तेन उक्तम्

**'अर्कपत्राणि भक्षयित्वाऽन्धीभूतोऽस्मि। अतः कूपे पतितः' इति ।[12]**

तदा गुरोः उपदेशं प्राप्य उपमन्युः स्वर्गवैद्य-अश्विनीकुमारद्वयं स्तुतवान्।

**'अश्विनौ स्तुहि। तौ देवभिषजौ त्वां चक्षुष्मन्तं कर्तारौ'।**

**स एवमुक्त उपाध्यायेनोपमन्युरश्विनौ स्तोतुमुपचक्रमे देवावश्विनौ वाग्भिरृग्भिः।।[13]**

तौ तस्य पुरतः प्रादुर्भूतौ। यदा खाद्यं दत्तवन्तौ तदा सः गुरवे अर्पणं विना खादितुम् अस्वीकृतवान्। उपमन्योः गुरुं प्रति भक्तिं दृष्ट्वा सन्तुष्टौ देवौ चिकित्सायाः आश्वासनं दत्तवन्तौ यत् सः पुनः दृष्टिं प्राप्स्यति। अपि च तौ तं आशीर्वादम् अयच्छताम् यत् सः श्रेयसं प्राप्स्यति, तस्य दन्ताः सुवर्णवर्णाः भविष्यन्ति:।

उपमन्युः पुनः दृष्टिम् प्राप्तवान्। शिष्यस्य मुखात् सर्वाणि वृत्तान्तानि श्रुत्वा गुरुः तस्मै आशीर्वादं दत्तवान्, सः चतुर्वेदानां शास्त्राणां च पूर्णज्ञानं प्राप्नुयात् इति।

उपमन्युः विशेषतया महत्त्वपूर्णा अस्ति। महर्षि आयोद धौम्येन शिष्यस्य मानसिकशक्तिः, सहनशक्तिः, निष्ठा, भक्तिः, इत्यादीनां परीक्षणं वारं वारं कृतम्। अन्ते शिष्यः गुरोः कठिनपरीक्षाम् उत्तीर्णः आसीत्। अर्कवृक्षस्य पत्राणि खादित्वा सः दृष्टिहीनः भूत्वापि गुरुभक्तिं न त्याक्तवान्। अपि च गुरुभक्तेः उदाहरणं स्थापितवान्।

**दीर्घतमा-**

अस्य कथा महाभारतस्य आदिपर्बणि सम्भवपर्वाध्याये वर्णिता अस्ति। ऋषि उतथ्यः तस्य पिता उतथ्यः ममता माता च।

**अथोतथ्य इति ख्यात आसीद्धीमानृषिः पुरा।**

**ममता नाम तस्यासीद्भार्या परमसंमता।।[14]**

उतथ्यस्य पुत्रोऽयं दीर्घतामसप्रवेष्टत्वात् अर्थात् अन्धरूपेण जातः, अस्मात् दीर्घतमा इति नाम्ना परिचितः।

**स वै दीर्घतमा नाम शापादृषिरजायत।।[15]**

तस्य माता यदा गर्भवती आसीत्, तदा तस्याः देवरः बृहस्पतिः सकामः सन् तां याचितवान्, तदा सा ज्ञापितवती यत् सः रमणसमयः नासीत्। कारणम् तस्मिन् समये तस्याः गर्भे पुत्रः आसित्।[16] सा तस्याः देवरं तर्कयित्वापि निवारयितुं प्रयतते स्म।[17] तु सः तत् न श्रुतवान्।

**एवमुक्तस्तदा सम्यग्बृहस्पतिरुदारधीः।**

**कामात्मानं तदात्मानं न शशाक नियच्छितुम् ।।[18]**

कामुकः बृहस्पतिः गर्भवत्याः याचनाम् उपेक्ष्य आनन्दितः अभवत्।[19] तदा गर्भस्थः बालकः स्वस्य पादद्वयेन वीर्यप्रवेशद्वारम् अवरुद्धवान्। क्षेत्रं वीर्यं न अप्राप्नोत्। अथ क्रुद्धः सन् तस्मै अन्धरूपेण जन्मग्रहणस्य शापं दत्तवान्।

**तं दृष्ट्वा पतितं शुक्रं शशाप स रुषान्वितः॥**

**उतथ्यपुत्रं गर्भस्थं निर्भर्त्य भगवानृषिः।**

**यन्मां त्वमीदृशे काले सर्वभूतेप्सिते सति ॥**

**एवमात्थ वचस्तस्मात्तमो दीर्घं प्रवेक्ष्यसि।[20]**

यद्यपि पुण्यवान् विद्वान् च सः आसीत् तथापि सुरभिपुत्रेण कामधेनुना कामधर्मोपदिष्टः यत्र तत्र सः संभोगं करोति स्म। समीपस्थाः ऋषयः एतेन क्रुद्धः भवति। तस्य व्यवहारेण तस्य पत्नी प्रद्वेषापि असन्तुष्टा अभवत्।[21] तदा मातुः आदेशानुसारं दीर्घतमसः पुत्राः तं भेलया गङ्गायां प्लावयन्ति स्म।

**लोभमोहाभिभूतास्ते पुत्रास्तं गौतमादयः।**

**बध्वोडुपे परिक्षिप्य गङ्गायां समवासृजन्।।[22]**

बलिराजः गङ्गायां स्नानार्थम् आगत्य तां प्लवमानं दृष्ट्वा तेजस्वीं मत्वा तं बालकं जनयितुं प्रासादं नीत्वा राज्ञीम् तं गमनार्थम् उपदिष्टवान् इति। वृद्धं अन्धं च दीर्घतमसं दृष्ट्वा राज्ञी सुदेष्णा स्वयं न गत्वा तस्याः स्थाने तस्य समीपं दासीम् प्रेषितवती।[23] तदा एकादश पुत्राः जाताः। बलिराजः ज्ञातवान् यत् बालकाः तस्य न सन्ति। तदा तेन तस्य पत्नी सुदेष्णा दीर्घतमाय पुनः प्रेषिता। सुदेष्णा ब्राह्मणस्य औरसः पञ्च तेजस्वी-पुत्रान् जनयति स्म।

तेषां नामानि- अङ्गः, बङ्गः, कलिङ्गः, पुण्ड्रः सुष्मः च। अङ्गदेशः, बङ्गदेशः इत्यादयः तस्य पुत्रस्य नामधेयेन देशस्य नामकरणं भवति।

**अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः।**
**तेषां देशाः समाख्याताः स्वनाम कथिता भुवि**
**अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः।**
**कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः**
**पुण्ड्रस्य पुण्ड्राः प्रख्याताः सुह्माः सुह्मस्य च स्मृताः।**
**एवं बलेः पुरा वंशः प्रख्यातो वै महर्षिजः।।[24]**

**धृतराष्ट्रः-**

महाभारते वहवः असामान्यवपुर्जनाः विद्यन्ते। तत्र धृतराष्ट्रः एकः। अस्मिन् महाकाव्ये आदिपर्वणि सम्भवपर्वाध्याये अस्य जन्मकथा प्राप्यते। तस्य पिता कृष्णद्वैपायनव्यासः माता च अम्बिका। तस्य भ्राता पाण्डुः इति।

**धृतराष्ट्र इति ख्यातः कृष्णद्वैपायनात्मजः।**
**दीर्घबाहुर्महातेजाः प्रज्ञाचक्षुर्नराधिपः॥[25]**

धृतराष्ट्रस्य विवाहः अभवत् गान्धारराजस्य यदुवंशस्य सुबलस्य पुत्र्याः गान्धार्याः सह।

**ततो गान्धारराजस्य प्रेषयामास भारत।**
**अचक्षुरिति तत्रासीत् सुबलस्य विचारणा।।**
**कुलं ख्यातिं च वृत्तं च बुद्ध्या तु प्रसमीक्ष्य सः।**
**ददौ तां धृतराष्ट्राय गान्धारीं धर्मचारिणीम् ॥[26]**

तस्य शतपुत्राः एका कन्या च आसन्।[27]

सः जन्मना दृष्टिहीनः आसीत्। तत्पश्चात् एतादृशः इतिहासः वर्तते। राजा शान्तनुः गङ्गां विवाहं कृतवान्। तयोः देवव्रतः नाम पुत्रः अभवत्। दासराजः स्वपुत्रीं सत्यवतीं शान्तनुना सह विवाहं कारितवान् एकेन शर्तेन। शर्तानुसारं देवव्रतः अविवाहितः स्थास्यति सिंहासनाधिकारं न स्वीकरिष्यति च इति। तत् अङ्गीकृत्य महतीं प्रतिज्ञां कृत्वा पितुः विवाहकार्यं सम्पादितवान्। ततः सः भीष्म इति नाम्ना प्रसिद्धः[28]

हस्तिनापुरराजस्य शान्तनोः पुत्रद्वयं जातं सत्यवत्याः गर्भे। तौ चित्राङ्गदः विचित्रवीर्यश्च।[29] तौ निःसन्ततौ मृतौः। सत्यवती तदा भीष्मं वंशविलुप्तिभयात् विधवाभ्रातृजाययोः गर्भे सन्तानम् उत्पादयितुं परामर्शं कृतवती। सा तस्याः गुणवतः विवाहपूर्बपुत्रस्य श्रीकृष्णद्वैपायनव्यासस्य प्रस्तावं दत्तवती।[30]

तदा मात्रादेशानुसारं रात्रौ अम्बिकायाः गृहं तस्याः पत्युः ज्येष्ठप्राता द्वैपायनव्यासदेवः प्रविष्टः। राज्ञी तं दृष्ट्वा भयभीता नेत्रे निमीलितवती।

**ततोऽम्बिकायां प्रथमं नियुक्तः सत्यवागृषिः।**
**दीप्यमानेषु दीपेषु शरणं प्रविवेश ह।**
**तस्य कृष्णस्य कपिलां जटां दीप्ते च लोचने।**
**बभ्रूणि चैव श्मश्रूणि दृष्ट्वा देवी न्यमीलयत् ।।**[31]

अस्मात निमीलनकारणात् व्यासवचनानुसारं पुत्रः दर्शनशक्ति-वाधितः जातः।

दृष्टिहीनः इत्यस्मात् तस्मै राज्यं न प्रदत्तम्।

**धृतराष्ट्रस्त्वचक्षुत्वाद् राज्यं च प्रत्यपद्यत।**
**पारसवत्वाद् विदुरो राजा पाण्डुर्बभूव ह।।[32]**

धृतराष्ट्रः आसीत् पाण्डवान् प्रति दयाहीनः स्नेहहीनः च।[33] सः न केवलं नेत्रान्धः, सः पुत्रप्रेम्णा अपि एतादृशः अन्धः आसीत् यत् सः विदुरेण उक्तं वचनं[34] न पालितवान्। दुर्योधनस्य जन्म शुभाय नासीत्। तस्य जन्मदिने प्रकृतिः विरूपा जाता।[35] अतः सः दुर्योधनः त्याज्यः आसीत् इति विदुरस्य अभिप्रायः। धृतराष्ट्रेण तद्वत् कर्म कृतं चेत् सामान्यतः मङ्गलाय अभवत्।

**न चकार तथा राजा पुत्रस्नेहसमन्वितः।**
**ततः पुत्रशतं पूर्णं धृतराष्ट्रस्य पार्थिव ॥[36]**

इयम् अन्धता विनाशका कुरुक्षेत्रयुद्धमूला महाभारतरचनायाः उत्सः च। कुरुक्षेत्रयुद्धं नाभविष्यत् चेत् तत्समाजः भिन्नस्रोतपुर्णः स्यात्। एवमपि वक्तुं शक्यते यत् एतत् चरित्रं विना प्राचीनः इतिहासः साहित्यं च कदाचित् अन्यस्रतसा प्रवाहितौ अभविष्यताम्।

**उपसम्हारः-**

एते जनाः शारीरिक-अवरोधयुक्ताः सन्तऽपि जीवनयापने मनोवल-रहिताः नाभवन्। ते आत्मकर्मणि स्थिराः आसन्। तेषां कर्म एतादृशं आसीत् येन ते साहित्ये समाजे च विशेषस्थानम् अधिकृतवन्तः।

**सन्दर्भसूची-**


1. वसुः,राजशेखरः।(सारानुवादः)कृष्णद्वैपायनव्यासकृतम् महाभारतम्। प्रथम-न्यू-लतिका-संस्करणम्,१४२८ बंगाब्दे। प्रकाशकः- अमलः पुष्टिः। परिवेशकः- मलय-प्रकाशनी, रमानाथ-मजुम्दार् स्ट्रिट्, कोलकाता ७००००९.
2. MAHABHARATA (Sanskrit Text And English Translation) Translation according to M. N. Dutt Edited and Revised with Introduction by Dr. Ishwar Chandra Sharma and Dr. O. N. Bimali Parimal Publication, 27/28, Shakti Nagar,Delhi- 110007 (INDIA)
3. Abnormal Psychology Published by Pearson India Education Services Pvt. Ltd, CIN: U72200TN2005PTC057128. Head Office: 1st Floor, Berger Tower, Plot No. C-001A/2, Sector 16B, Noida - 201 301, Uttar Pradesh, India.
4. नेत्र-रक्षा- लेखकः- श्रीस्वामी ओमानन्दः सरस्वती प्रकाशकः-हरियाणा-साहित्यसंस्थानम्, गुरुकुल-झज्जरः जिला- झज्जरः, सप्तमसंस्करणम्- २००१.
5. अमरकोशः- काशीस्थ संस्कृत-वुक-डिपो इत्यस्याधिपैः मास्टर खेलाडीलाल एण्ड सन्स इत्यतैः श्रीसीताराम मुद्रालये मुद्रापयित्वा प्रकाशितम्।

**पाद टिप्पणी:**

[1]महा.स्वर्गारोहण. ५. श्लो-५०

[2]तत्रैव आदि.३. श्लो-३३

[3]तत्रैव श्लो-३४

[4]तत्रैव श्लो-३७

[5]तत्रैव श्लो-४१

[6]महा. आदि.३. श्लो-४२

[7]तत्रैव श्लो-४५

[8]तत्रैव श्लो-४७

[9]तत्रैव श्लो-४९

[10] महा. आदि.३. श्लो-५०-५१

[11] तत्रैव श्लो-५४

[12] तत्रैव श्लो-५५

[13] तत्रैव श्लो-५६

[14] महा, आदि, १०४. श्लो-९

[15] तत्रैव श्लो-२२

[16] तत्रैव श्लो-१०-११

[17] तत्रैव श्लो-१२-१३

[18] तत्रैव श्लो-१४

[19] महा, आदि, १०४. श्लो-१५-२०

[20] तत्रैव श्लो-२०-२२

[21] तत्रैव श्लो-२६-२९

[22] तत्रैव श्लो-३९

[23] तत्रैव श्लो-४४-४६

[24] महा. आदि. १०४. श्लो-५३-५५

[25] तत्रैव ६७. श्लो-८५

[26] तत्रैव ११०. श्लो-११-१२

[27] महा. आदि.११६. श्लो-१६-१८

[28] तत्रैव १००. श्लो-१०२-१०३

[29] तत्रैव १०१. श्लो-२-३

[30] तत्रैव १०५.श्लो-१४-१७,१९

[31] तत्रैव १०६. श्लो- ४-५

[32] महा. आदि.१०९. श्लो-२५

[33] तत्रैव १३९. श्लो-२७

[34] तत्रैव ११५. श्लो-३८-३९

एकेन कुरु वै क्षेमं कुलस्य जगतस्तथा।
त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्॥
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्।
स तथा विदुरेणोक्तस्तैश्च सर्वेद्विजोत्तमैः ॥

[35] तत्रैव श्लो- २५-२८

[36] तत्रैव श्लो-४०